## प्रवाहणस्य ढे । (२८/११२९)

[1]प्रवाहणस्य ढे परतः उत्तरपदस्याचामादेरचः [2]वृद्धिर्भवति, पूर्वपदस्य वा भवति[3] । प्रवाहणस्य अपत्यम् प्रावाहणेयः, प्रवाहणेयः । 'शुभ्रादिभ्यश्च' (४.१.१२३/११२६) इति ढक् प्रत्ययः ॥

## तत्प्रत्ययस्य च । (२९/११२८)

[4]ढक्प्रत्ययान्तस्य प्रवाहणशब्दस्य तद्धितेषु परतः उत्तरपदस्याचामादेरचः[5] वृद्धिर्भवति, पूर्वस्य तु वा । प्रवाहणेयस्य अपत्यम् प्रावाहणेयिः, प्रवाहणेयिः । [6]प्रावाहणेयकम्, प्रवाहणेयकम् । बाह्यतद्धितनिमित्ता वृद्धिः ढाश्रयेण विकल्पेन बाधितुमशक्या इति सूत्रारम्भः ॥

## नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् । (३०/१४६०)

नञः उत्तरेषां शुचि ईश्वर क्षेत्रज्ञ कुशल निपुण इत्येतेषामचामादेरचः[7] वृद्धिर्भवति, पूर्वपदस्य वा भवति तद्धिते ञिति, णिति, किति च परतः । शुचि[8] – अशौचम्, आशौचम् । ईश्वर – अनैश्वर्यम्, आनैश्वर्यम् । क्षेत्रज्ञ – अक्षैत्रज्ञ्यम्, आक्षैत्रज्ञ्यम् । कुशल – अकौशलम्, आकौशलम् । निपुण – अनैपुणम्, आनैपुणम् ।

अत्र केचिदाहुः इयं पूर्वपदस्य वृद्धिरप्राप्तैव विभाषा विधीयते । न नञ्पूर्वात् तत्पुरुषात् (५.१.१२१/१७८३) इत्युत्तरो भावप्रत्ययः प्रतिषिध्यते । तत्र शुच्यादिभ्यः एव प्रत्यये कृते पश्चान्नञ्समासे सति वृद्धिरनङ्गस्यापि वचनात् भवति इति । तदपरे न मृष्यन्ते । भाववचनादन्योपि हि तद्धितो वृद्धिनिमित्तमपत्यादिषु अर्थेषु नञ्समासादेव विद्यते । बहुव्रीहेश्च नञ्समासात् भाववचनोऽपि अस्ति, तत्राङ्गाधिकारोपमर्दनं न युज्यते इति । अक्षेत्रज्ञानीश्वरौ तत्पुरुषौ एव ब्राह्मणादिषु (५.१.१२४/१७८८) पठ्येते, ततः ताभ्यां भावे ष्यञ् भवति ॥

## यथातथयथापुरयोः पर्यायेण । (३१/१७८९)

यथातथ यथापुर इत्येतयोः नञः [9]उत्तरयोः पर्यायेण अचामादेरचः[10] वृद्धिर्भवति तद्धिते ञिति, णिति, किति [11]च परतः । आयथातथ्यम्, अयाथातथ्यम् । आयथापुर्यम्, अयाथापुर्यम् । अयथातथ अयथापुर इति ब्राह्मणादिषु नञ्समासौ एतौ द्रष्टव्यौ । सूत्रे यथातथयथापुरशब्दौ तु 'यथाऽसादृश्ये' (२.१.७/६६१) इति अव्ययीभावसमासौ । तथा [12]नपुंसकाश्रयं ह्रस्वत्वं कृतम् । भाष्ये तु यथादर्शितं अयथातथाभावः (म. भा. ३. ३२२) इति तथा सुप्सुपेति समासो लक्ष्यते ॥

---

1. प्रवाहणशब्दस्य क.इ.ह. 2. स्थाने इत्यधिकम् इ.ह. 3. तद्धिते ञिति णिति किति प्रत्यये परतः इत्यधिकम् क. 4. प्रवाहणस्य इति वर्तते । तदिति ठञ्प्रत्ययस्य इत्यर्थः इत्यधिकम् ब. क. इ. 5. स्थाने इत्यधिकम् क.इ.ह. 6. प्रवाहणस्य इदं इत्यधिकम् क.इ. 7. स्थाने इत्यधिकम् क.इ. 8. इति इत्यधिकम् क. 9. पूर्वोत्तरपदयोः ब. 10. स्थाने इत्यधिकम् क.इ.ह. 11. प्रत्यये इत्यधिकम् क. 12. च इत्यधिकम् ब.ड.

THE SANSKRIT LIBRARY
FAIRFIELD, IA 52556